मात्रच् – ऊरुमात्री । जानुमात्री (५.२.३७/१८३८) । तयप् – पञ्चतयी । [1]दशतयी (५.२.४२/१८४३) । ठक् – आक्षिकी । शालाकिकी (४.४.२/१५५०) । ठञ् – लावणिकी (४.४.५२/१६०२) । ठक्ठञोर्भेदेन ग्रहणं ठनादिनिवृत्त्यर्थम् । कञ् – यादृशी । तादृशी (३.२.६०/४२९) । क्वरप् – इत्वरी । [2]नश्वरी (३.२.१६३/३१४२) । ख्युन् – आढ्यङ्करणी । सुभगंकरणी (३.२.५६/२९७३) ।

[३३८] नञ्स्नञ्ईकक्तरुणतलुनानामुपसङ्ख्यानम् । (म. भा. २.२०९)

स्त्रैणी । पौंस्नी । शाक्तीकी । याष्टीकी । तरुणी । तलुनी[3] ॥

## यञश्च । (१६/४७१)

ङीप् इत्येव । यञन्ताच्च प्रातिपदिकात् स्त्रियां ङीप् प्रत्ययो भवति । गार्गी । वात्सी ।

[३३९] [4]अपत्यग्रहणं कर्तव्यम् । (म. भा. २.२०९)

इह मा भूत्, 'द्वीपादनुसमुद्रं यञ्' (४.३.१०/१३८०) द्वैप्या (म. भा. २.२०९) । [5]योगविभागः उत्तरार्थः ॥

## प्राचां ष्फ तद्धितः । (१७/४७३)

यञः इत्येव । प्राचामाचार्याणां मतेन यञन्तात्[6] स्त्रियां ष्फः प्रत्ययो भवति, स च [7]तद्धितसञ्ज्ञः । षकारो ङीषर्थः । प्रत्ययद्वयेनेह स्त्रीत्वं [8]व्यज्यते । तद्धितग्रहणं[9] प्रातिपदिकसञ्ज्ञार्थम् । गार्ग्यायणी । वात्स्यायनी । अन्येषाम्[10] – गार्गी । वात्सी । सर्वत्रग्रहणमुत्तरसूत्रादिह [11]अपकृष्यते बाधकबाधनार्थम् । आवट्यात् (४.१.७५/५२९) चापं वक्ष्यति, तमपि बाधित्वा प्राचां ष्फ एव [12]यथा स्यात् । आवट्यायनी ॥

## सर्वत्र लोहितादिकतन्तेभ्यः । (१८/४७६)

यञः इत्येव । पूर्वेण विकल्पे प्राप्ते नित्यार्थं वचनम् । [13]सर्वत्र लोहितादिभ्यः [14]कतपर्यन्तेभ्यः (४ १.१०५/११०७) [15]यञन्तेभ्यः स्त्रियां ष्फः प्रत्ययो भवति[16] । कतशब्दः स्वतन्त्रं यत् प्रातिपदिकं तदवधित्वेन परिगृह्यते कपिशब्दात् परः कपि कत इति, न प्रातिपदिकावयवः कुरुकतेति । [17]लौहित्यायनी । [18]शांसित्यायनी . बाभ्रव्यायणी ।

कण्वात्तु शकलः पूर्वः कतादुत्तर इष्यते ।
पूर्वोत्तरौ तदन्तादी ष्फाणौ तत्र प्रयोजनम् ॥ (म. भा. २.२१०)

प्रातिपदिकेष्वन्यथा पाठः, स एवं व्यवस्थापयितव्यः इति मन्यते । कतन्तेभ्यः इति बहुव्रीहितत्पुरुषयोरेकशेषः, तथा 'कण्वादिभ्यो गोत्रे' (४.२.१११/१३३२) इति । [19]तत्र तत्पुरुषवृत्त्या संगृहीतो [20]मध्यपाती शकलशब्दो यञन्तः प्रत्ययद्वयमपि प्रतिपद्यते । शाकल्यायनी । शाकल्यस्येमे छात्राः शाकलाः (म. भा. २.२१०) ॥

---

1. नास्ति क. 2. गत्वरी ड. फ. 3. तरुणतलुनशब्दौ गौरादिषु पठ्येते, तेन औट्सिद्धे इदं वचनमनर्थकम् इत्यधिकम् इ, गौरादिपाठात् सिद्धम् इत्यधिकम् क. ड. 4. आपत्यग्रहणं ड. 5. पृथग्योगकरणमुत्तरार्थम् अ. 6. प्रातिपदिकात् इत्यधिकम् क. ड. 7. तद्धितसञ्ज्ञकः ब. क. ड, भवति इत्यधिकम् ग. 8 अभिव्यज्यते ब. 9. तु इत्यधिकम् इ.10. मतेन इत्यधिकम् ह. 11. अनुकृष्यते ब. 12. यथा नास्ति ड. 13. सर्वत्र नास्ति ड. 14. कतन्तेभ्यः क. 15. यञन्तेभ्यः नास्ति इ. 16. सर्वेषामाचार्याणां मतेन इत्यधिकम् क. ड. फ. 17. लोहित्यायनी क. 18. सांशित्यायनी क. ड. 19. तत्र नास्ति ब, तथा फ. 20. मध्यवर्ती ब.